COMPILED & CIRCULATED BY
TUMPA JANA(ASSISTANT PROFESSOR)
DEPT. OF SANSKRIT
NARAJOLE RAJ COLLEGE

# सन्धिः

**संज्ञा-**उच्चारणसमये परस्परसन्निहितानां वर्णानां मिलनमेव सन्धिः संहिता वा।सन्धयः त्रिविधाः।ते यथा-

(१)स्वरसन्धिः

(२)व्यञ्जनसन्धिः

(३)विसर्गसन्धिः

## स्वरसन्धिः

-स्वरवर्णेन सह स्वरवर्णस्य मिलनेन स्वरसन्धिः भवति।स्वरसन्धेः प्रकाराः यथा-(१)स्ववर्णदीर्घसन्धिः (२)गुणसन्धिः (३)वृद्धिसन्धिः (४)यण्सन्धिः (५)पूर्वरुपसन्धिः (६)यान्तवान्तादेशसन्धिः (७)प्रकृतिभावसन्धिः।

**स्ववर्णदीर्घसन्धिः**-पाणिनेः 'अकः सवर्णे दीर्घः'(६/१/१०१)इति सूत्रेण सवर्णदीर्घसन्धिः भवति।अस्य सूत्रस्य अर्थः -अ,इ,उ,ऋ एतेषां वर्णानां सवर्णे परे द्वयोः वर्णानां स्थाने एकः सवर्णः दीर्घः आदिष्टो भवति।अयं सवर्णदीर्घसन्धिः भवति।उदाहरणं यथा-

अल्प+अंशः=अल्पांशः(अ+अ=आ)

**COMPILED & CIRCULATED BY**
TUMPA JANA(ASSISTANT PROFESSOR)
**DEPT. OF SANSKRIT**
**NARAJOLE RAJ COLLEGE**

तव+आसनम्=तवासनम्(अ+आ=आ)

माला+अधिपस्य=मालाधिपस्य(आ+अ=आ)

विद्या+आलयः=विद्यालयः(आ+आ=आ)

मुनि+इन्द्रः=मुनीन्द्रः(इ+इ=ई)

कवि+ईश्वरः=कवीश्वरः(इ+ई=ई)

मही+इन्द्रः=महीन्द्रः(ई+इ=ई)

पृथ्वी+ईश्वरः=पृथ्वीश्वरः(ई+ई=ई)

मधु+उत्सवः=मधूत्सवः(उ+उ=ऊ)

लघु+ऊर्मिः=लघूर्मिः(उ+ऊ=ऊ)

वधू+उत्सवः=वधूत्सवः(ऊ+उ=ऊ)

भू+ऊर्द्धम्=भूर्द्धम्(ऊ+ऊ=ऊ)

पितृ+ऋणम्=पितृऋणम्(ऋ+ऋ= ॠ )

**गुणसन्धिः**-पाणिनेः'आद्गुणः'इति(६/२/८७)सूत्रेण गुणसन्धिः भवति।सूत्रस्य अर्थः - अकारस्य आकारस्य वा इकारे ईकारे च परे एकारः,उकारे ऊकारे च परे ओकारः,ऋकारे

COMPILED & CIRCULATED BY
TUMPA JANA(ASSISTANT PROFESSOR)
DEPT. OF SANSKRIT
NARAJOLE RAJ COLLEGE

ऋॠकारे परे अर्कार:,लृकारे परे अल्कार: च द्वयो: वर्णयो: स्थाने आदिष्टो भवति।उदाहरणं यथा-

देव+इन्द्र:=देवेन्द्र:(अ+इ=ए)

महा+इन्द्र:=महेन्द्र:(आ+इ=ए)

गण+ईश:=गणेश:(अ+ई=ए)

रमा+ईश:=रमेश:(आ+ई=ए)

नील+उत्पलम्=नीलोत्पलम्(अ+उ=ओ)

महा+उदय:=महोदय:(आ+उ=ओ)

गृह+ऊर्द्धम्=गृहोर्द्धम् (अ+ऊ=ओ)

गंगा+ऊर्मि:=गंगोर्मि:(आ+ऊ=औ)

देव+ऋषि=देवर्षि:(अ+ऋ=अर्)

महा+ऋषि=महर्षि:(आ+ऋ=अर्)

तव+लृकार:=तवल्कार:(अ+लृ=अल्)

**वृद्धिसन्धि:**-पाणिने:'वृद्धिरेचि:'(६/२/८८)इति सूत्रेण वृद्धिसन्धि: भवति।सूत्रस्य अर्थ:-अकारस्य वा आकारस्य एकारे ऐकारे च परे द्वयो: वर्णयो: स्थाने ऐकार:,ओकारे

COMPILED & CIRCULATED BY
TUMPA JANA(ASSISTANT PROFESSOR)
DEPT. OF SANSKRIT
NARAJOLE RAJ COLLEGE

औकारे च परे द्वयोः वर्णयोः स्थाने औकारः,एवंच ऋकारे ॠकारे च परे द्वयोः वर्णयोः स्थाने आर्कारः आदिष्टो भवति।उदाहरणं यथा-

एक+एक=एकैकम्(अ+ए=ऐ)

तथा+एतत्=तथैतत्(आ+ए=ऐ)

मत+ऐक्यम्=मतैक्यम्(अ+ऐ=ऐ)

महा+ऐरावतः=महैरावतः(आ+ऐ=ऐ)

जल+ओघः=जलौघः(अ+ओ=औ)

महा+ओषधिः=महौषधिः(आ+ओ=औ)

गत+औत्सुक्यम्=गतौत्सुक्यम्(अ+औ=औ)

सदा+औत्सुक्यम्=सदौत्सुक्यम्(आ+औ=औ)

प्र+ऋच्छति=प्रार्च्छति(अ+ऋ=आर्)

**यण्सन्धिः**-पाणिनेः'इको यणचि'इति सूत्रेण यण्सन्धिः भवति।अस्य सूत्रस्य अर्थः-इ,उ,ऋ,लृ एतेषां वर्णानां असवर्णे स्वरे परे य्,व्,र्,ल् वर्णाः क्रमशः आदिष्टाः भवन्ति।अयं हि यण्सन्धिः।उदाहरणं यथा-

इति+अपि=इत्यपि(इ+अ=य्)

**COMPILED & CIRCULATED BY**
TUMPA JANA(ASSISTANT PROFESSOR)
**DEPT. OF SANSKRIT**
**NARAJOLE RAJ COLLEGE**

नदी+अम्वु=नद्यम्वु(ई+अ=य)

सु+आगतम्=स्वागतम्(उ+आ=व्)

तनू+ईश्वरः=तन्वीश्वरः(ऊ+ई=व्)

पितृ+आदेशः=पित्रादेशः(ऋ+आ=र्)

लृ+आकृतिः=लाकृतिः(लृ+आ=ल्)

**पूर्वरुपसन्धिः**-पाणिनेः'एङः पदान्तादति' इति सूत्रेण पूर्वरुपसन्धिः भवति।पदान्ते स्थितस्य एकारस्य स्थाने अवग्रहचिह्नं वर्तते।अयं हि पूर्वरुपसन्धिः।उदाहरणं यथा-

ते+अपि=तेऽपि(ए+अ=ए)

को+अपि=कोऽपि(ओ+अ=ओ)

**यान्तवान्तादेशसन्धिः**-पाणिनेः'एचोऽयवायावः इति सूत्रेण यान्तवान्तादेशसन्धिः भवति।ए,ओ,ऐ,औ इत्येतेषां वर्णानां स्थाने असवर्णे स्वरे परे अय्,अव्,आय्,आव् इत्येते आदेशः क्रमशः भवन्ति।अयं यान्तवान्तादेशसन्धिः।उदाहरणं यथा-

शे+अनम्=शयनम्(ए+अ=अय्)

विनै+अकः=विनायकः(ऐ+अ=आय्)

भो+अनम्=भवनम्(ओ+अ=अव्)

**COMPILED & CIRCULATED BY**
TUMPA JANA(ASSISTANT PROFESSOR)
**DEPT. OF SANSKRIT**
**NARAJOLE RAJ COLLEGE**

स्तौ+अकः=स्तावकः(औ+अ=आव्)

**प्रकृतिभावसन्धिः**-'प्लुतप्रगृह्या अचि नित्यम्' इति पाणिनिसूत्रेण प्रकृतिभावसन्धिः सिध्यते।ईकारात् औकारात् एकारात् वा द्विवचनात् स्वरे परे सन्धिः न भवति।अयं हि प्रकृतिभावः।उदाहरणं यथा –

हरी+एतौ=हरी एतौ

साधू+इमौ=साधू इमौ

लते+एते=लते एते ।।

X-------------------X